'अविनाश' हा। तुज समर्पितो ही कृती॥ १॥ अगाध महीती तुझी श्रुती न जी पुरे जाणते। मनास न कळे तसे। चकित होत बा वेद ते। न व्यक्त जगती तुझे। सत् - स्वरूप साकारतो। कवित्व बघ तोकडे। तव गुणास ना पार तो॥ २॥ महिम्न नच ही सुधा। मधुर जी शिवा आवडे। जरी पुढती ब्रह्मा तो। नवल ना तया भासते। पतीत मज पावण्या। मन रमो तुझे गायनी। कृतार्थ कर शंकरा। त्रिपुरा दाहका जीवनी॥ ३॥ जगी जनक ब्रह्म तो। जगत् जीवना श्रीहरी॥ शिवा विलय साजसे। कथित वेद हे तीनही त्रिकाल तव रूप बा। बुध जनास संमोहना। अजाण तुजला कसे। सकल जाणती सांग ना॥ ४॥ कशास जग निर्मिले। नच कुणासही आकळे। भ्रमात पडता जग। शिव कधी कुणा ना मिळे। कुतर्क बघ संभ्रवी। विचल भाविकांना करे। जगात मूळ कां कुणा। गवसले नदीचे बरे?॥ ५॥ जगात ऋतुचक्र नि विविध रंग सृष्टीतले। चराचर ही निर्मिशी अतिसुरेख वेलीफुले। महेश बहूरूपता। प्रणत रम्य ही भोंवती। जरी कळत नास्तिका। पढतमूर्ख ते भांडती॥ ६॥ त्रिवेद शिवपंथ तो। कपिल सांख्य ना योग बा। रूचे पशुपतीस जो। विविध तो गमे वैष्णवा। अखेर शिवसागरी। सकल पंथ सामावती। जशा सकल त्या नद्या। धवल सिंधुला भेटती॥ ७॥ जयास खट्वाङ्ही। परशु भस्म नंदी प्रिया। करात कवटी धरी। अजिन सर्प शोभे जया। शिवा वरद आत्मजा। उघडि नेत्र आता

तरी। कृपाळु शिवा तोषता। सकल सिद्धि लाभे खरी। ८॥ अशाश्वत जगास या। परमतत्व मानी कुणी। कुणास सत् भासते। असत् सांगती ते कुणी। अता त्रिपुरनाशका। शरण येत चक्रावुनी। शिवा शरण येत जो। सकल पावतो जीवनी॥ ९॥ वितर्क घडता हरी। जनक अग्नील मापिती। महिम्न कळता तुझे। षड्रिपू झणी त्यागती बघा षड्रिपू कसे। करित मानवाची स्थिती। शिडाविणची तारू ते। कि भवसागरी धावती॥ १०॥ शिवास शिर पंकजा। विमल आपुले वाहता। म्हणोन शिव देतसे। अभय रावणा तोषता। त्रिलोक जग जिंकता। जणु अजेय लंकापती। विनम्र शरणागता। सकल अर्पितो श्रीपती॥ ११॥ त्रिलोक जय लाभता। बहु वसे अहंता मना। म्हणे कठीण जिंकणे। मजसी आज कैलास ना। क्षणात बघ लोपले। अखिल राज्य लंकापती। करी जवळ ना कधी। विबुध ते अहंतेप्रती॥ १२॥ त्रिलोक अन् जिंकला सबल इद्र बाणासुरे। अजेय बघ बाण तो। नवल ना परी हे खरे। जया वरद श्रीपती। नच उणे तया जीवनी। शिवा शरण येत जो। सकल लाभते ते मनी॥ १३॥ सुरास भय जाहले। त्रिनयना विष पाहता। जगा अभय अर्पीले। सकल ते स्वये प्राशता। विनाश टळला परी। विष प्रभाव तो आगळा। शिवास बहु शोभतो। विमल कंठ तो बा निळा॥ १४॥ समाधि तुज लागता। मदन जाळ टाकी जरी। हळूच तिसऱ्या शिवा। उघडि लोचना सत्वरी। क्षणि मदन भस्म तो। तुजसि स्वस्थता लाभते। जगी विचल राहती। मदन बाण ज्याला रूते॥ १५॥ करित शिव तांडवा। प्रलय नर्तनी भांस कां। फिरे भुज तुझे असे। विखरती नभी तारका। जटा झटकता भये। पळति स्वर्गिच्या देवता। शिवास लय सृष्टिचा। नच गमे खरा रक्षिता॥ १६॥ जटेत बघ शोभते। धवल शुभ्र ती गोमती। जरी गगन दिव्य ती। तव शिरात बिंदुप्रति। शिवे भगीरथाप्रती। धरतिसी

तिला आणले। जगात द्वीप सात ते। बहूत साजरे शोभले॥ १७॥ सदाशिव करे गमे। बहु धनुष्य मेरू महा। तुझ्या धरतीच्या रथा। रवि व चद्र चक्रे पहा। उपेन्द्र बघ बाण ज्या। जगत ब्रह्मा तो सारथी। असा शिव समर्थ त्या। त्रिपुरदाह लीलेप्रती॥ १८॥ शिवा नित सहस्त्र ते। कमलपुष्प वाहे हरी। क्षणी नयन अर्पीले। कमल एक होता कमी। हरीस शिव तोषता। नित सुदर्शना अर्पिले। करात बघ विष्णूला। जगत रक्षण्या शोभले॥ १९॥ सदाशिव समर्थ तो। सकल जाणतो भावना। मनात जरि वासना। नच फळेल आराधना। विषाद जगती वृथा।· अढळ ठेव श्रद्धा मनी। मना फळसि यज्ञ ते। श्रुतिस जाणता जीवनी॥ २०॥ शिवा सकल अर्पीतो। प्रमुख यज्ञश्री दक्ष तो। परी तव कृपा नसे। तर कसा फळे यज्ञ तो। शिवास अपमान तो। सकल नाश होतो तिथे। तिथेच शिव नांदतो। विमल भाव भक्ती जिथे॥ २१॥ पिताच बघ भाळतो। विमल शारदेच्या वरी। बनोन मृग ब्रह्मा तो। विचल धावतो सत्वरी।शिवास नच हे रूचे। शिव बने क्षणी व्याध तो। नभात शिव बाण तो। नित मृगाकडे धावतो॥ २२॥ क्षणी मदन जाळिला। नित धनुष्य ज्याचे करी। असा मदन भस्म तो। तृण जळे जसे सत्वरी। तपास शिव पावता। प्रिय तुला सदा पार्वती। शिवास वश मानिते। नच अजाण स्त्री मुग्ध ती॥ २३॥ शिवा सतत सोबती। विहरता स्मशानी भुते। गळ्यात नरमुंडकी। तनुस भस्म ते शोभते। भयावह स्वरूप हे। वरदची गमे सेवका। अमंगल दिसे परी। परम मंगला भाविका॥ २४॥ समाधि जप साधना। करित नित्य योगी झटे। फुले सुखद भावना। तनुस रम्य· काटा फुटे। झरा नयनि पाझरे। शिव सरोवरी डुंबती। शिवासम नसे जगी। परमतत्व बा संप्रती॥ २५॥ महेश रवि चंद्रमा। जल समीर ना आप तू। तुझी धरती आत्मजा। गगन तेज नी अग्नि तू।

असाच शिव ज्ञात जो। सिमित ते बुधा भासते। शिवाविण नसे जगी। अमर तत्त्व विश्वास ते॥२६॥ महिम्न नच वर्णवे। म्हणति वेद ते तीनही। तसेच नच तीन त्या। बघ कळे अवस्थेसही। परि शिव त्रिवेदनी। त्रिभुवनात साकारतो। ध्वनी प्रणत ब्रह्मा तो। शिव स्वरूप ओंकारा तो॥२७॥ महेश भव रूद्र तो। पशुपती शंव उग्र तो। शिवाष्टकचि भीम तो। अन् तयात ईशान तो। जगी सकल देवता। श्रृति तुला नमिते खरे। सतेज शिव रूप ते। प्रिय तया नमू आदरे॥२८॥ स्वरूप अणुचे परी। नभ शिवा पडें ठेगणे। सदा वंसत अंतरी। प्रिय तुला अनंता वने। लहान अन् थोर तू। त्रिनयना सखा भाविका। वसे जवळ दूर तू। नमन घेई सर्वात्मका॥२९॥ रजोगुण वसे बहु। जनक त्या भवा वंदितो तमोगुण वसे बहु हर अशा शिवा वंदितो। जगी सुखद तत्व तू। बहुगुणी मृडा वंदितो। शिवा सकल यज्ञ तू। परम निर्गणा वंदितो॥३०॥ जरी विचल या मना। चरण हे तुझ लाभले। तयास खुळ का शिवे। रजत कांचनाचे भले। असा चकीत होत असे। सबळ प्रेरणा जाहली। कवित्व सुमने तुला। वरद शंकरा वाहिली॥३१॥ विशाल गिरी काजळा। सकल ओतले सागरी। करीं सुरतरू बघा। सरळ लेखणी साजरी। जरी विमल शारदा। धरतिपत्र घे लेखना। अहर्निश लिही तरी। शिवगुणास तो पार ना॥३२॥ शिवास भजती पहा। ऋषि प्रभू तसे दैत्य ते। शिरी सगुण निर्गुणा। धवल चद्रिका शोभते। शिव स्तवन अर्पिता। मधुर अमृताचे परी। महिम्न रचना जगी। अमर पुष्पदंता करी॥३३॥ कि निर्मल महिम्न हे। पठण जो करी आदरे। विशुद्ध मन ठेवता। नित शिवास जो कां स्मरे। बनेल शिवरूद्र तो। शिव जगी तया स्थान ते। जगात धन कीर्ति नी। विमल संतती लाभते॥३४॥ महेश तुझिया परी। नच बरी दुजी देवता। गिरीश महिमा परी। नच बरा दुजा तारंता। सदाशिव

गुरूपरी। अमर तत्व ना जीवनी। खरा शिवचि मंत्र तो। त्रिभुवनात संजीवनी॥ ३५॥ मिळेल बहू पूण्य बा। पठत या महिम्न जे। करीत सगळ्या क्रिया। मिळत अेक सोळांश ते। तपास बसला दिले। बहुत दान दिक्षा जरी। तथा भ्रमणभूवरी। सकल तीर्थ केले जरी॥ ३६॥ मिळेल शिवभक्त कां। जगति पुष्पदंताप्रती। महान नृप शोभतो। सकल यज्ञ ते मानिती। शिवा शरण येत तो। शिव तयावरी कोपता। महिम्न तव दिव्य हे। रचित लोपते भ्रष्टता॥ ३७॥ महिम्न विनये खरे। पठण रोज केली कृती। शिवासमिप पोचवी। घडवि स्वर्ग मोक्षाप्रती। महिम्न वरदान हे। ऋषी मुनी तया पूज्य ते। असे सुफल स्तोत्र हे। नच ठरे कधी व्यर्थ ते॥ ३८॥ सुशद्ध सुमने पूजा। शिवपदावरी वाहता। सदाशिवचि पावतो। शिव महेश माझा पिता॥ ३९॥ न तत्त्व तव जाणतो। शिव कसा मला न कळे। परि नमन त्या शिवा। मज स्वरूप जे कां कळे॥ ४०॥ जरी पठण अेकदा। द्वय कि तीनदा जो करे। हरी सकल पाप तो। शिव जगात जातो खरे॥ ४१॥शिवस्तवन ही सुधा। अमर पुष्पादंताकृती। हरी सकल पाप जी। प्रिय शिवा असे फार ती। करीत निठ पाठ जो। घडत चित्त अेकाग्रता। तयास शिव पावतो। सकल सृष्टीची देवता॥ ४२॥शिवस्तवन पूर्ण बा। जनक श्रेष्ठ गंधर्वची। मनोहरचि पुण्यदा। अनुपमेय हे संत्यची। 'सदाशिवसुता' गमे। अमर दिव्य वाणी खरी। शिवापर्ण असो सदा। सकल दुःख चिंता हरी॥ ४३॥ इति श्रीपुष्पदंतविरचितं शिवमहिम्न स्तोत्र संपूर्ण॥

श्री द्वादशज्योतिलिंग स्तोत्र

शिवा प्रथम वंदितो चरण सोमनाथा बरे। द्वितीय शिव मल्लिकार्जून नमु तया आदरे॥ तृतीय शिव वंदुया असुर ज्या महांकाल तो। सदाशिव चतुर्थची पुढती खास ओंकार तो॥ चला हिमगिरीवरी

शिखर भव्य केदार तो। करू नमन शंकरा जगति भीम तो पावतो॥ जगात नित वंद्य त्या सकल वंदु विश्वेश्वरा॥ करू नमन आदरे बहुत त्र्यबंका ईश्वरा॥ महेश तुज वंदितो परळि वैजनाथा शिवा। गिरीश तुज वंदितो सकल सिद्ध नागेश बा। उमेश स्थित मंदिरी गगन भेदी रामेश्वरा। जगी सकल भाविका अभय अर्पि घृष्णेश्वरा॥ सुलिंग दशदोन हे अमर दिव्य ज्योतिप्रती। जगात शिवभाविका सतत मार्ग ते दाविती॥ जपेल शिवनाम जो अमर नित्य बाराखरे। तरी शिवचि पावतो पळति दूर गंडांतरे॥ (श्रीद्वादशज्योतिर्लिंग स्तोत्र संपूर्णम्)

कालभैरवाष्टक

ॐ देवराजसेव्यमानपावनांघ्रि पंकजं। व्यालयज्ञ सूत्रमिन्दुशेखरं कृपाकरम्। नारदादियोगीवृन्दवन्दितं दिगंबरं। काशिकापुराधिनाथ कालभैरवं भजे॥ १॥ भानुकोटिभास्वरं भवब्धितारकं परं। नीलकंठमिस्पितार्थदायकं त्रिलोचनम्। कालकालमम्बुजाक्षमक्षशूलमक्षरं। काशिकापुराधिनाथ कालभैरवं भजे॥ २॥ शूलटंकपाशदण्डपाणिमादिकारणं। श्यामकायमादिदेवमक्षरं निरामयम्। भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं। काशिकापुराधिनाथ कालभैरवं भजे॥ ३॥ भुक्तिमुक्तिदायकं प्रशस्तचारूविग्रहं। भक्तवत्सलं स्थितं समस्तलोकविग्रहम्। विनिक्वणनमनोज्ञहेमकिंकिमंणालसत्कटिं। काशिकापुराधिनाथ कालभैरवं भजे॥ ४॥ धर्मसेतुपालकं अधर्ममार्गनाशकं। कर्मपाशमोचकं सुशर्मदायकं विभुम्। स्वर्णवर्णशेषपाशशोभितांगमण्डलं। काशिकापुराधिनाथ कालभैरवं भजे॥ ५॥ रत्नपादुकाप्रभाभिरामपादयुग्मकं नित्यमद्वितीयमिष्टदैवतं निरंजनम्। मृत्यूदर्पनाशनं करालदंष्ट्रमोक्षणं। काशिकापुराधिनाथ कालभैरवं भजे॥ ६॥ अट्टहासभिन्नपद्मजाण्डकोशसंततिं।

दृष्टिपातनष्टपापजालमुग्रशासनम्। अष्टसिद्धिदायकं कपालमालिकन्धरं। काशिकापुराधिनाथ कालभैरवं भजे॥७॥ भूतसंघनायकं विशालकीर्तिदायकं। काशिकावासलोकपुण्यपापशोधक विभुम्। नीतिमार्गकोविदं पुरातनं जगत्पतिं। काशिकापुराधिनाथ कालभैरवं भजे॥८॥ कालभैरवाष्टकं पठन्ति ये मनोहरं। ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम्। शोकमोहदैन्यलोभ कोपतापनाशनं। ते प्रयान्ति कालभैरवांघ्रिसंन्निधिं नरा ध्रुवम्॥९॥

इति श्रीमच्छंकराचार्यविरचितं कालभैरवाष्टकं संपूर्णम॥

श्रीशिवकवचम्।

वज्रदंष्ट्रं त्रिनयनं कालकंठमरिंदमम्।
सहस्त्रकरमत्युग्रं वंदे शंभुमुमापतिम्॥१॥
अथापरं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रम्।
जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ते॥२॥
ऋषभ उवाच।
नमस्कृत्वा महादेवं विश्वव्यापिनमीश्वरम्।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम्॥३॥
शुचौ देशे समासीनो यथावत्कल्पितासनः।
जितेंद्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम्॥४॥
हृत्पुण्डरीकांतरसन्निविष्टं स्वतेजसा व्याप्तनभोवकाशम्।
अतींद्रियं सूक्ष्ममनंतमाद्य ध्यायेत्परानंदमयं महेशम्॥५॥
ध्यानावधूताखिलकर्मबंधश्चिरं चिदानंदनिमग्नचेताः।
षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम्॥६॥
मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे।
तन्नाम दिव्यं वरमंत्रमुलं धुनोतु मे सर्वमघं हृदिस्थम्॥७॥
सर्वत्र मां रक्षतु विश्वमुर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा।

अणोरणीयानुरूशक्तीरेक: स ईश्वर: पातु भयादशेषात्॥ ८॥
यो भुस्वरूपेन बिभर्ति विश्वं पायात्स भुमेर्गिरिशोऽष्टमूर्ति:।
योऽपांस्वरूपेण नृणां करोति संजीवनं सोऽवतु मां जलेभ्य:॥ ९॥
कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलील:।
स कालरूद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात्॥ १०॥
प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणि:।
चतुर्मुखस्तत्पुरुषस्त्रिनेत्र: प्राच्यां स्थितं रक्षतु मामजस्त्रक्॥ ११॥
कुठारवेदांकुशपाशशूलकपालढक्काक्षगुणान्दधान:।
चतुर्मुखो नीलरूचिस्त्रिनेत्र: पायाच्छ्रतीघोरो दिशि दक्षिणस्याम्॥ १२॥
कुंदेंदुशंखस्फटिकावभासो वेदाक्षमालावरदाभयांक:।
त्र्यक्षश्चतुर्वक्त्र उरूप्रभाव: सद्योधिजातोऽवतु मां प्रतीच्याम्॥ १३॥
वराक्षमालाभयटंकहस्त: सरोजकिंजल्कसमानवर्ण:।
त्रिलोचनश्चारूचतूर्मुख मां पायादुदिच्यां दिशि वामदेव:॥ १४॥
वेदाभयेष्टांकुशपाशटंककपालढक्काक्षकशूलपाणि:।
सितद्युति: पंचमुखोऽवतान्मामीशान ऊर्ध्व परमप्रकाश:॥ १५॥
मूर्धानमव्यान्मम चंद्रमौलिर्भालं मम्याव्यादथ भालनेत्र:।
नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथ:॥ १६॥
पायाच्छती मे श्रुतिगीतकीर्ति: कपोलमव्यात्सततं कपाली।
वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां सदा रक्षतु वेदजिह्व:॥ १७॥
कंठं गिरीशोऽवतु नीलकंठ: पाणिद्वयं पातु पिनाकपाणि:।
दोर्मुलमव्यान्मम धर्मबाहुर्वक्ष:स्थलं दक्षमखांतकोऽव्यात्॥ १८॥
ममोदरं पातु गिरींद्रधन्वा मध्यं ममाव्यान्मदनांतकारी।
हेरंबतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे॥ १९॥
ऊरूद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरोऽव्यात्।
जंघायुगं पुंगवकेतुरव्यात्पादौ ममाव्यात्सुरवंद्यपाद:॥ २०॥
महेश्वर: पातु दिनदियामे मां मध्ययामेऽवतु वामदेव:।

त्रिलोचनः पातु तृतीययामे वृषध्वजः पातु दिनात्ययामे ॥ २१ ॥
पायान्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे।
गौरीपतिः पातु निशावसाने मृत्युंजयो रक्षतु सर्वकालम् ॥ २२ ॥
अंतःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिःस्थितं माम्।
तदंतरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समंतात् ॥ २३ ॥
तिष्ठंतमव्याद्भुवनैकनाथः पायादव्रजंतं प्रमथाधिनाथः।
वेदांतवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः शयानम् ॥ २४ ॥
मार्गेषु मां रक्षतु नीलकंठः शैलादिदुर्गेषु पुरत्रयारिः।
अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तीः ॥ २५ ॥
कल्पांतकाटोपपटुप्रकोपस्फुटाट्टहासोच्चलिताण्डकोशः
घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः ॥ २६ ॥
पत्त्यश्वमातंघगटावरूथसहस्त्रलक्षायुतकोटिभीषणम्।
अक्षौहिणीनां शतमाततायिनां छिंद्यान्मृडो घोरकुठारधारया ॥ २७ ॥
निहंतु दस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरांतकस्य।
शार्दूलसिंहर्क्षवृकादिहिंस्त्रान्संत्रासयत्वीशधनुः पिनाकः ॥ २८ ॥
दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि।
उत्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः ॥ २९ ॥

श्रीशिवाष्टोत्तरशतनामानि

१. ॐ शिवाय नमः २. ॐ महेश्वराय नमः ३. ॐ शंभवे नमः ४. ॐ पिनाकिने नमः ५. ॐ शशिशेखराय नमः ६. ॐ वामदेवाय नमः ७. ॐ विरूपाक्षाय नमः ८. ॐ कपर्दिने नमः ९. ॐ नीललोहिताय नमः १०. ॐ शंकराय नमः ११. ॐ शूलपाणये नमः १२. ॐ खट्वांगिने नमः १३. ॐ विष्णुवल्लभाय नमः १४. ॐ शिपिविष्टाय नमः १५. ॐ अंबिकानाथाय नमः १६. ॐ श्री

त्रिलोचनः पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे॥ २१॥
पायान्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे।
गौरीपतिः पातु निशावसाने मृत्युंजयो रक्षतु सर्वकालम्॥ २२॥
अंतःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिःस्थितं माम्।
तदंतरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समंतात्॥ २३॥
तिष्ठंतमव्याद्भुवनैकनाथः पायादव्रजंतं प्रमथाधिनाथः।
वेदांतवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः शयानम्॥ २४॥
मार्गेषु मां रक्षतु नीलकंठः शैलादिदुर्गेषु पुरत्रयारिः।
अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तीः॥ २५॥
कल्पांतकाटोपपटुप्रकोपस्फुटाट्टहासोच्चलिताण्डकोशः
घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः॥ २६॥
पत्त्यश्वमातंघगटावरूथसहस्त्रलक्षायुतकोटिभीषणम्।
अक्षौहिणीनां शतमाततायिनां छिंद्यान्मृडो घोरकुठारधारया॥ २७॥
निहंतु दस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरांतकस्य।
शार्दूलसिंहर्क्षवृकादिहिंस्त्रान्संत्रासयत्वीशधनुः पिनाकः॥ २८॥
दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि।
उत्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः॥ २९॥

श्रीशिवाष्टोत्तरशतनामानि

१. ॐ शिवाय नमः २. ॐ महेश्वराय नमः ३. ॐ शंभवे नमः ४. ॐ पिनाकिने नमः ५. ॐ शशिशेखराय नमः ६. ॐ वामदेवाय नमः ७. ॐ विरूपाक्षाय नमः ८. ॐ कपर्दिने नमः ९. ॐ नीललोहिताय नमः १०. ॐ शंकराय नमः ११. ॐ शूलपाणये नमः १२. ॐ खट्वांगिने नमः १३. ॐ विष्णुवल्लभाय नमः १४. ॐ शिपिविष्टाय नमः १५. ॐ अंबिकानाथाय नमः १६. ॐ श्री

नीलकंठाय नमः १७. ॐ भक्तवत्सलाय नमः १८. ॐ भवाय नमः १९. ॐ शर्वाय नमः २०. ॐ त्रिलोकेशाय नमः २१. ॐ शितिकंठाय नमः २२. ॐ शिवप्रियाय नमः २३. ॐ उग्राय नमः २४. ॐ निलग्रीवाय नमः २५. ॐ कामारये नमः २६. ॐ अंधकासुरसूदनाय नमः २७. ॐ गंगाधराय नमः २८. ॐ ललाटाक्षाय नमः २९. ॐ कालकालाय नमः ३०. ॐ कृपानिधये नमः ३१. ॐ भिमाय नमः ३२. ॐ परशुहस्ताय नमः ३३. ॐ मृगपाणये नमः ३४. ॐ जटाधराय नमः ३५. ॐ कैलासवासिने नमः ३६. ॐ कवचिने नमः ३७. ॐ कठोराय नमः ३८. ॐ त्रिपुरांतकाय नमः ३९. ॐ वृषांकाय नमः ४०. ॐ वृषभारूढाय नमः ४१. ॐ भस्मोद्धूलितविग्रहाय नमः ४२. ॐ सामप्रियाय नमः ४३. ॐ स्वरमयाय नमः ४४. ॐ त्रयीमूर्तये नमः ४५. ॐ अमीश्वराय नमः ४६.ॐ सर्वज्ञाय नमः ४७. ॐ परमात्मने नमः ४८. ॐ सोमसूर्याग्निलोचनाय नमः ४९. ॐ हविषे नमः ५०. ॐ यज्ञमयाय नमः ५१. ॐ सोमाय नमः ५२. ॐ पंचवक्त्राय नमः ५३. ॐ सदाशिवाय नमः ५४. ॐ विश्वेश्वराय नमः ५५. ॐ वीरभद्राय नमः ५६. ॐ गणनाथाय नमः ५७. ॐ प्रजापतये नमः ५८. ॐ हिरण्यरेतसे नमः ५९. ॐ दुर्घर्षाय नमः ६०. ॐ गिरीशाय नमः ६१. ॐ सर्वेश्वराय नमः ६२. ॐ अनघाय नमः ६३. ॐ भुजंगभूषणाय नमः ६४. ॐ भर्गाय नमः ६५. ॐ गिरिधन्वने नमः ६६. ॐ गिरिप्रियाय नमः ६७. ॐ कृत्तिवाससे नमः ६८. ॐ पुरारातये नमः ६९. ॐ भगवते नमः ७०. ॐ प्रमथाधिपाय नमः ७१. ॐ मृत्युंजयाय नमः ७२. ॐ सूक्ष्मतनवे नमः ७३. ॐ जगद्व्यापिने नमः ७४. ॐ जगद्गुरवे नमः ७५. ॐ व्योमकेशाय नमः ७६. ॐ महासेनजनकाय नमः ७७. ॐ चारूविक्रमाय नमः ७८. ॐ रूद्राय नमः ७९. ॐ भूतपतये नमः ८०. ॐ स्थाणवे

नमः ८१. ॐ अहिर्बुंध्न्याय नमः ८२. ॐ दिगंबराय नमः ८३. ॐ अष्टमूर्तये नमः ८४. ॐ अनेकात्मने नमः ८५. ॐ सात्विकाय नमः ८६. ॐ शुद्धविग्रहाय नमः ८७. ॐ शाश्वताय नमः ८८. ॐ खंडपरशवे नमः ८९. ॐ अजाय नमः ९०. ॐ पाशविमोचनाय नमः ९१. ॐ मृडाय नमः ९२. ॐ पशुपतये नमः ९३. देवाय नमः ९४. ॐ महादेवाय नमः ९५. ॐ अव्ययाय नमः ९६. ॐ हरये नमः ९७. ॐ पूष्पदंतभिदे नमः ९८. ॐ अव्यग्राय नमः ९९. ॐ दक्षध्वरहराय नमः १००. ॐ हराय नमः १०१. ॐ भगनेत्रभिदे नमः १०२. ॐ अव्यक्ताय नमः १०३. ॐ सहस्त्राक्षाय नमः १०४. ॐ सहस्त्रपदे नमः १०५. ॐ अपवर्गप्रदाय नमः १०६. ॐ अनंताय नमः १०७. ॐ तारकाय नमः १०८. ॐ परमेश्वराय नमः

प्रार्थना

मौलो चंद्रदलं गले च गरलं जुटे च गंगाजलं। व्यालम् वक्षसि चानलं च नयने शूलं कपालं करे। वामांगे दधतं नमामि सततं। प्रालेय शैलात्मजाम्। भक्तक्लेशहरं। हरं स्मर हरं। कर्पूरगौरं परम्॥

श्री शिव प्रार्थना- शिवहर शंकर। नमामि शंकर शिव शंकर शंभो। हे गिरिजापति भवानी शंकर शिव शंकर शंभो।

श्री कुलदेवतेची सेवा

ध्यानमंत्र- सर्वमंगल मांगल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्रंबके गौरी नारायणी नमोस्तु ते। म्हणून देवीचे सर्व मंत्र म्हणावे.

सरस्वती स्तोत्र- या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता। या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना। या

ब्रह्माच्युतशंकरप्रभुतिभिर्देवै: सदा वन्दिता। सा मां पातु सरस्वती भगवती नि:शेषजाड्यापहा ॥

॥ श्री महाकाली स्तोत्र।

प्रातः स्मरामि भवभीतिहरां सुरेशीं। कालीकृपार्थनयनां नवमेघवर्णाम्। सूर्येन्दुवन्हिनयनां भृकुटीकरालाम्। सृक्कप्रवाहरूचिरां नरमुण्डमालां॥ १॥ प्रातर्नमामि शिवरूपशवोपविष्टाम्। मारप्रयुद्धकरकांचि विभूषिताङगीम्॥ मुण्डां भजे वरमसि दधतीं कराब्जै। कर्णावतंसशवयुग्म किशोर भूषणाम्॥ २॥ प्रातर्भजामि निजभक्तिवरप्रदात्री। धात्रीं समस्तजगतां द्रुतवाक्यदात्रीं॥ पंचत्रिकोणनिलये कुरू सामरस्ये। आद्येच शक्तिनिकरै स्मितिभि: परिताम्॥ ३॥ प्रात: स्मरामि वसु यत्र सरोजमध्ये। ब्रह्मादिमातृ वसुभैरव भैरवीभि:॥ इंद्रादिवज्र किरण: स्थितिगेहवित्ताम्। स्वांगेषडंग युवतिर्दधती करालाम॥ ४॥ प्रात: स्मरामि पितृकाननमध्यसंस्थाम्॥ देवर्षिवृन्दशवमुण्डशिवापरिताम्॥ मायामहासुरहरां शिवरूपिणीं ताम्। कालानुबद्धहृदयां जननी परां वा॥ ५॥ य: श्लोकपंचकमिदं पठति प्रभाते। काली स्मरत्यनुदिनं भुविभारनम्र:॥ विद्याविलाससुखभूरि धनं च लब्ध्वा। चांते प्रयाति शिवलोकमनन्य लाभ:॥ ६॥ इति श्री महाकाली स्तोत्रम् श्री महाकाल्यर्पणमस्तु॥

श्री कालीमाता कवच

ॐ अस्य श्री कालीका कवचस्य भैरवऋषिर्गायत्री छंद:
श्री कालिका देवतासद्य: वैरीसंघनाशे विनियोग:।
ॐ कालिका घोररूपाद्धा सर्वकामप्रदा शुभा।
सर्व देव स्तुता देवी शत्रूनाश करोतु ते॥ १॥
न्हीं न्हीं स्वरूपिणी चैव। न्हीं न्हीं न्हीं संगिनी तया।

ऱ्हीं ऱ्हीं क्षौं क्षौं स्वरूपा। सा सर्वदा शत्रूनाशिनी॥ २॥
श्रीं ऱ्हीं ओं रूपिणी। भवबन्ध विमोचिनी।
यया शत्रूर्हतो निशुम्भश्च महासुर: दैत्यो॥ ३॥
वैरीनाशाय वंदिताम्। कालिका शंकर प्रियाम।
ब्राह्नी शैवी वैष्णवी वाराहि नृसिंहिका कौमारी।
श्री चामुण्डा खादन्तु मम द्रिषित:॥ ४॥
सुरेश्वरी घोररूपा चण्डमुण्ड विनाशिनी।
मुण्डमाला वृंतागिय सवत: पातु माम् सदा॥ ५॥
ऱ्हीं ऱ्हीं कालिके घोरदंष्ट्रे रूधिरप्रिये रूधिरपूर्णवक्त्रेच।
साधिरा वितिस्तिन:॥ ६॥
मम शत्रून खादय खादय। हिंसय हिंसय मारय मारय॥ ७॥
धिं धिं धिं धिं। छिंदी छिंदी। उच्चाटय उच्चाटय।
द्रावय द्रावय। शोषय शोषय॥ ८॥
या तु ध्याति चामुण्डे। हरा हरि बाम्बी कालिकायै।
सर्व शत्रून समर्पयामी स्वाहा॥ ९॥
किट किट किर किर कट्ट कट्ट मर्दय मर्दय मोहय मोहय।
हर हर मम रिपून ध्वंसय ध्वंसय भक्षय भक्षय। त्रोटय त्रोटय॥ १०॥
यातु धानिका चामुण्डा। सर्वजनान राजपुरूषाय ये देहिदेहि।
नूतन धान्य जयक्ष जयक्ष क्षांक्षां क्षुं क्षौं क्षौं क्ष स्वाहा॥ ११॥

ललितापंचक स्तोत्र (मराठी) हृदय विकारावरील उपाय

स्मरे सकाळी ललितेच्या मी कमलासमवदना।
विशाल मोती चमके नाकी अरूण वर्ण अधरा॥
कुंडल मणि ते रमते कानी नयने भिडती ज्या।
सुंदर भाली तिलक कस्तुरी मंदस्मित ते मुखा॥ १॥
भजे सकाळी ललितेच्या मी कर कल्पलताला।

झळक जेथे अंगठी, भरले कर पल्लवा॥
बाहू शोभती माणिक आणि सुवर्ण वलयामुळे।
पुंड्रक धनु करी पुष्पबाण ते अंकुशही जेथे॥ २॥
नमे सकाळी ललितेच्या मी कमलरूप चरणा।
भक्त कामना पुरवूनी जे हो भवसागर नौका॥
ब्रह्मादिक जे सूर नायकही पूज्य मानिती ज्याला।
ध्वज अंकुश ही पद्मचक्र ती अमित लांछने ज्या॥ ३॥
स्तवे सकाळी परमहितैषी, याच भवानी ललितेला।
महती वर्णिली वेदांनी मिती करूणामय निर्मला॥
विद्येश्वरी परी अगम्य राही मन वाणी वेदा।
विधनिर्मिती स्थिती - विलयासी मूळ कारणीभूता॥ ४॥
कमला किंवा महेश्वरी वा अथवा कामेश्वरी।
जगज्जननी वा त्रिपूर सुंदरी तसेच श्री शांभवी॥
प्ररा शक्ती वा वाणी देवी अशा रितीने हे ललिते।
आवाहन मी करित सकाळी तुजसि पुण्य नामे॥ ५॥
सुभगदायी आनंदमयी हे स्तोत्र पंचश्लो की।
म्हणूनी प्रभाती जो नर प्रार्थी ललिता मातेशी॥
प्रसन्न होवून त्वरीत तया ती दे विद्या लक्ष्मी।
अनंत किर्ति तशीच होई विमल सुखा वृध्दी॥ ६॥
(श्रीमद् आद्य शंकराचार्य यांच्या ललितपंचक स्तोत्राद्वारे)

श्री ललितेचा महामंत्र मिळणे फार कठीण आहे, तथापी भक्तांनी तळमळीने
खालील ध्यानाच्या श्लोकाचे अनुसंधान करावे त्याने ही देवता प्रसन्न होईल.

चतुर्भूजे चंद्र कलां तंमे कुचोन्तते कुंकुम रागशोभे।
पुंड्रेषु पाशांऽकुश पुष्पबाण, हस्ते नमस्ते जगदेकमाता॥

जगदंबेच्या कुंकवाप्रमाणे लाल आहे व तिच्या मस्तकावर चंद्राची कोर आहे.

चार हात असून त्यामध्ये पुंड्रंया उसाचे धनुष्य, पुष्पबाण, पाश, अंकूश अशी आयुधे आहेत याप्रमाणे अखिल विश्वास मोहित करणारे महा-भगवती

ललितेचे स्वरूप आहे.

ललिता (पच्चकम्) स्तोत्र (संस्कृत)

प्रात: स्मरामि ललिता वदनार विन्दं।
विम्बाधरं पृथुल मौक्तिक शोभिनासम्॥
आकर्ण दीर्घ नयनं मणि कुण्डलाढ्यं।
मंदस्मितं मृगमदोज्ज्वल भालदेशम्॥ १॥
प्रातर्भजामि ललिता भुजकल्पवल्लीं।
रक्ताङ् गुलीयलसदङ्गुलि पल्लवाढ्याम्॥
माणिक्यहेम वलयाङग दशोभमानां।
पुण्ड्रेक्षुचाप कुसुमेषुसृणी दधानाम्॥ २॥
प्रातर्नमामि ललिता चरणार विन्दं।
भक्तेष्ट दान निरतं भवसिन्धुपोतम्॥
पद्मासनादि सूरनायक पूजनीयं।
पद्माङकुश-ध्वज सुदर्शन लाछांनाढ्यम्॥ ३॥
प्रात: स्तुवे परशिवां ललितां भवानी।
त्रयन्तेवेद्यविभवां करूणानवद्याम्॥
विश्वस्य सृष्टी-विलय-स्थिति हेतु भुतां।
विद्येश्वरीं निगमवाङमन सादिदूराम॥ ४॥
प्रातर्वदामि ललिते तव पुण्य नाम।
कामेश्वरीति कमलेति महेश्वरीति॥

श्री शाम्भवीति जगतां जननी परेति।
वाग्देवतेति वचसा त्रिपुरेश्वरीति॥ ५॥
यः श्लोक पंचकमिदं ललिताम्बिकायाः।
सौभाग्यदं सुललितं पठति प्रभाते॥
तस्मै ददति ललिता झटिति प्रसन्ना।
विद्या श्रियं विमल सौख्यमनन्तकीर्तिम्॥ ६॥

श्री दुर्गा स्तोत्र

श्रीगणेशाय नमः॥ श्रीदुर्गायै नमः॥ नगरात प्रवेशले पंडुनंदन॥ तों देखिले दुर्गास्थान। धर्मराज करी स्तवन जगदंबेचे तेधवा॥ १॥ जय जय दुर्गे भुवनेश्वरी। यशोदागर्भसंभवकुमारी। इंदिरारमणसहोदरी नारायणी चंडिकेंबिके॥ २॥ जय जय जगदंबे विश्वकटुंबिनी। मूलस्फूर्तिप्रवणवरूपिणी ब्रह्मानंदपददायिनी। चिद्विलासिनी अंबिके तू॥ ३॥ जय जय धराधरकुमारी। सौभाग्यगंगे त्रिपुरसुंदरी। हेरंबजननी अंतरी। प्रवेशी तूं आमचे॥ ४॥ भक्तहृदयारविंद भ्रमरी। तुझे कृपाबळें निर्धारी। अतिमूढ निगमार्थ विवरी। काव्यरचना करी अद्भूत॥ ५॥ तुझिये कृपावलोकने करून। गर्भांधासी येतील नयन। पांगुळ करील गमन दूर पंथे जाऊंनी॥ ६॥ जन्मादारभ्य जो मुका। होय वाचस्पति समान बोलका। तूं स्वानंदसरोवरमराळिका। होसी भाविका सुप्रसन्न॥ ७॥ ब्रह्मानंदे आदिजननी। तव कृपेची नौका करूनी। दुस्तर भवसिंधु उल्लंघुनी। निवृत्तीतटा जाईजे॥ ८॥ जय जय आदिकुमारिके जय जय मूलपीठनायिके। सकलसौभाग्यदायिके। जगदंबिके मूलप्रकृतिके॥ ९॥ जय जय भार्गवप्रिये भवानी। भयनाशके भक्तवरदायिनी। सुभद्रकारिके हिमनगनंदिनी। त्रिपुरसुंदरी महामये॥ १०॥ जय जय आनंदकासार-मराळिके। पद्मनयने दुरितवनपावके। त्रिविधतापभवमोचके। सर्वव्यापके मृडानी॥ ११॥

शिवमानसकनकलतिके जय चातुर्यचंपककलिके। शुंभनिशुंभदैत्यांतके। निजजनपालके अपर्णे॥ १२॥ तव मुखकमलशोभा देखोनी। इंद्रबिंब गेले विरोनी। ब्रह्मादिदेव बाळे तान्ही। स्वानंदसदनी निजविसी॥ १३॥ जीव शिव दोन्ही बालके। अंबे त्वां निर्मिली कौतुके। स्वरूप तुझे जीव नोळखें। म्हणोनि पडला आवर्ती॥ १४॥ शिव तुझे स्मरणी सावचित्त। म्हाणोनि तो नित्यमुक्त स्वानंदपद हात। येतां तुझें कृपेने जननिये॥ १५॥ मेळवूनि पंचभूतांचा मेळ। त्वां रचिला ब्रम्हांडगोळ। इच्छा परततां तत्काळ। क्षणें निर्मूळ करिसी तूं॥ १६॥ अनंत बालादित्यश्रेणी। तव प्रभेंमाजी गेल्या लपोनी। सकल सौभाग्यशुभकल्याणी। रमारमण वरप्रदे॥ १७॥ जयशंकररिपुहरवल्लभे त्रैलोक्यनगरारंभस्तंभे। आदिमाये आत्मप्रिये। सकलारंभे मूलप्रकृति॥ १८॥ जय करूणामृतसरिते भक्तपालके गुणभरिते। अनंतब्रह्मांडफलांकिते आदिमाये अन्नपूर्णे॥ १९॥ तूं सच्चिदानंदप्रणववरूपिणी। सकलचराचरव्यापिनी। स्वर्गस्थितहितकारिणी। भवमोचनी ब्रह्मानंदे॥ २०॥ ऐकोनि धर्माचें स्तवन। दुर्गा जाहली प्रसन्न। म्हणे तुमचे शत्रु संहारीन। राज्यीं स्थापीन धर्माते॥ २१॥ तुम्हीं वास करा येथे। प्रगटो नेदीं जनांत। शत्रु क्षय पावती समस्त। सुख अद्भूत तुम्हां होय॥ २२॥ त्वां जें स्तोत्र केले पूर्ण। तें जे त्रिकाल करिती पठण। त्यांचे सर्व कामा पुरवीन। सदा रक्षीन अंतर्बाह्य॥ २३॥ इति श्रीयुधिष्ठिरविरचितं श्रीदुर्गास्तोत्रं समाप्तम्॥

॥ श्री सूक्त ॥ (मराठी)

॥ श्री गणेशाय नमः॥ प्रस्तावः ऋचा 'हिरण्यवर्णादि'। संस्कृतीं पंधरा पढा। कर्ते चार ऋषि त्यांना। जाणा आनन्द, कर्दम॥ १॥ इंदिरासुत, चिक्लीत। भावें यांतें नमूनिया। देवता कथिल्या दोन।

अग्नि, श्री नमितों तयां॥ २॥ अनुष्टुप् छंद या सूक्ता। नमूं. हें बीज 'श्री' नमूं। नमूं शक्ति सदा बीज। 'ऱ्हीं' जाणा कीलका नमूं॥ ३॥ 'क्लीं' कील जपूं येथे। श्रीं ऱ्हीं क्लीं होम-मंत्र की। घृतयुक्ताहुती देऊं। पंधराचि दिनींदिनीं॥ ४॥ शुद्धसत्व सदुद्योगी। उद्यमी यत्न जो करी। तयानेंहि पढावे हे। सूक्त ज्या धन-कामना॥ ५॥

श्रीसूक्त : हरि ॐ। सुवर्णा सारिखा रंग। हिरवा शालु शोभतो॥ गळा मोत्यांचिया माला। चंद्रबिंबासम श्रीमुख॥ १॥ देवीलक्ष्मि सुखें येई। पूजा ही मम स्वीकारी॥ अग्निदेवा तिला आणी। आहुति स्किरी मुखी॥ २॥ उपयुक्त मला लक्ष्मी। देवो ती गोधने मला॥ अश्व, हत्ती, रथां रत्नां। दासदासी निवासहि॥ ३॥ सेना-घोष निनांदूं दे। अरींना त्रास होऊं दे॥ बोलावितों तुला लक्ष्मी। लाडका बाल मी तुझा॥ ४॥ स्मित हास्य तुला शोभे। झळाळी वसनां तुझ्या। तृप्ता तूं तृप्तिदात्री तूं। दयार्द्र येई तूं गृही॥ ५॥ पद्मी शोभा दिसे तुझी। पद्म वर्णही शोभतो॥ चंद्रानने, यशोदात्रि। उज्ज्वल, तोषदायिनी॥ ६॥ त्रिलोकां देवतांना तूं। पोषिसी सुख देउनी॥ तुज मी नमितों लक्ष्मी। शरणागत मी तुला॥ ७॥ अलक्ष्मीमम नाशीं तुं। मागतो दान दे दये॥ सूर्य तेज तुझें देवि। तपस्याधिक जें असे॥ ८॥ तयानें शोभतो वृक्ष। बिल्व जो तुजला प्रिय॥ फळे त्याची तुझ्या हाती। जरा जीं नाशितीं स्वयें॥ ९॥ अज्ञान मालवीती जीं। संकटे दुर्घटे महा॥ स्वयें येवो मला देवो। कुबेर, श्री, कीर्ति चिन्मणी॥ १०॥ राष्ट्रोत्कर्ष तसा साधीं। राष्ट्री या जन्म घेत मी॥ महागाई निरवीं देवी। नुरवी दैन्य-नाम हि॥ ११॥ कीर्ति दे वाढवी सारें। घरी गडगंज तूं करी॥ ईश्वरी, सुंदरी, नाशीं। अलक्ष्मी तूं क्षुदा तृषा॥ १२॥ चंचला तूं दुराधर्षा। पुष्टा तूं गजगामिनी॥ स्वामिनी पंचभूतांची। येईं, मी तुज आळवी॥ १३॥ मनीषा, कामना, सत्यें। लाभोत मजला सदा॥ गोदुग्धादिकें अन्नें। यशश्री यांसि

आश्रयों॥१४॥ मिळो माझा, दयार्द्रे; तूं। दया-दानेंहि दे मला॥ कर्दमा तूं प्रजा देईं। मज माजींच तूं रहा॥१५॥ श्रीदेवी राहवी गेहीं। कुली माझ्या वसो सदा॥ माता मालावी वरो पद्मे। पद्ममालिनी, मी नमी॥१६॥ पर्जन्य वर्षवी स्निग्ध। चिक्लीता राहवीं गृहीं॥ मातेसि राहवीं गेहीं। कुली माझ्या वसो सदा॥ १७॥ दयार्दे, पुष्करिणी, पुष्टे। पिंगले पद्ममालिनी॥ अग्नि देवा तिला आणीं। जी चंद्राधिक उज्ज्वला॥ १८॥ वेत हातीं सुवर्णाचा। दंडहि धरिते करीं॥ हेममाला गळा शोभे। सूर्यतेजहि तें फिके॥१९॥ अग्निदेवा तिला आणीं। बोलवी तिजला इथे॥ उपयुक्त मला देवी। दासदासीही लाभूं दे॥२०॥ गोधने, अश्व, लाभूं दे। रथ, हत्ती, तसे मला॥ स्वातंत्र्य रामराज्याचें। राष्ट्रांराष्ट्रांसि लाभू दे॥२१॥ शान्ति तुष्टि तशी पुष्टि। सर्वांसि सुख लाभूं दे॥ मोक्ष सर्वां मिळो तेंवि। विश्व हें ज्ञानयुक्त हो॥२२॥ शुद्ध सत्वस्थ जो भक्त। उद्योगी रतला सदा॥ तयानेंहि पढावें हें। सूक्त ज्या धन-कामना॥२३॥ तथास्तु॥ इति शुभम्॥

श्रीसूक्त (संस्कृत)

हरि ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजाम्॥
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥१॥
तां म आवह जातवेदो लक्ष्मी मनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरूषानहम्॥२॥
अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम्।
श्रियं देवीमुपहवये श्रीर्मादेवी जुषताम्॥३॥
कांसोस्मितां हिरण्यप्राकारा मार्द्रां ज्वलंतीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोपहवये श्रियम्॥४॥
चंद्रा प्रभासां यशसा ज्वलन्तीं श्रियं लोके देव जुष्टामुदाराम।
तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे॥५॥

आदित्य वर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ बिल्वः।
तस्य फलानि तपसानुदन्तु मायान्त रायाश्च बाह्या अलक्ष्मी ॥ ६ ॥
अुपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोसुस्मिराष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ॥ ७ ॥
क्षुत्पिपासामलां जेष्ठां अलक्ष्मीं नाशयाम्यहम्।
अभूतिम् समृद्धिं च सर्वानिर्णुद मे गृहात ॥ ८ ॥
गंधद्वारां दुराधर्षां नित्यपुष्ठां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोप हवये श्रियम् ॥ ९ ॥
मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशुनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥
कर्दमेन प्रजाभूता मयि संभव कर्दम।
श्रियं वासयमे कुले मातरं पद्ममालिनीम ॥ ११ ॥
आपः स्त्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले ॥१२ ॥
आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्यमयीं लक्ष्मीं जातवेदो म आवह ॥ १३ ॥
आर्द्रां पुष्करिणीं पुष्टिं पिंङ्गलां पद्‌मालिनीम्।
चंद्रां हिरण्यमयीं लक्ष्मीं जातवेदो म आवह ॥ १४ ॥
तांम आवह जातवेदोलक्ष्मी मनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान विन्देयं पुरूषानहम् ॥ १५ ॥
यः शुचिः प्रयतोभूत्वा जुहुयादाज्य मन्वहम्।
सूक्तं पंचदशर्चं च श्रीकामः सततं जपेत् ॥ १६ ॥

लक्ष्मी सूक्त (''फलश्रुति'')

पद्मानने पद्मउरू पद्माक्षी पद्मसंभवे'
तन्मे भजसि पद्माक्षी येन सौख्यमलभाम्यहम् ॥ १ ॥
अश्वदायै गोदायै धनदायै महाधने।

धनं मे लभतां देवि सर्वकामांश्च देहिमे ॥ २ ॥
पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विष्णुमनोनूकुले त्व त्पादपद्ममयि संनिधत्स्व ॥ ३ ॥
पुत्रं पौत्रं धनं धान्यं हस्त्यश्वादि गवेरथम् ।
प्रजानां भवसिमाता आयुष्मंतं करोतुमे ॥ ४ ॥
धनं अग्निर् धनं वायुर् धनं सूर्यो धनं वसु : ।
धनं इंद्रो बृहस्पतिर् वरूणं धनं अस्तुमे ॥ ५ ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनोमह्य्म्ददातुसोमिन : ॥ ६ ॥
नक्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवंति कृतपुण्यानाम् भक्तानां श्रीसुक्तं जपेत् ॥ ७ ॥
सरसिजनिलये सरोजहस्ते धवल तरांशुक गंधमाल्यशोभे ।
भगवतिहरिवल्लभे मनोज्ञे त्रिभुवन भुति करीप्रसिद्मह्यम् : ॥८ ॥
विष्णुपत्नी क्षमादेवी माधवी माधव प्रियां ।
लक्ष्मीप्रिय सखीं देवी नमाम्यंच्युतवल्लभाम् ॥ ९ ॥
महालक्ष्मीच विद्महे विष्णुपत्नींच धीमहि ।
तन्नो लक्ष्मी प्रचोदयात ॥ १० ॥
श्री वर्चस्वमायुष्यमारोग्यमाविधात् शोभमानं महियते ।
धान्यंधनं पशु बहु पुत्र लाभं शतसंवत्सरं दीर्घमायु : ॥ ११ ॥

भू सूक्त (सीतेचा ध्यान मंत्र)

निलाम्भोज दलामि राम नयनां नीलाम्बरालङ्कृतां ।
गौरांगी शरदिन्दु सुंदरमुखी विस्मरे बीम्बाधराम् ॥
कारूण्य रूप वर्षीनी हरिहर ब्रह्मादिभीर्वंदिता ।
ध्यायेम सर्व जनेप्सितार्थ फलदां रामप्रियां जानकीम् ॥
हरिः ॐ। भूमिर्भूम्न्रा द्यौर्वरिणाऽन्तरिक्षे महित्वा उपस्थे ते देवदितेऽ

ग्निमन्नाद्यायादधे। आऽयं गौःपृश्निरक्रमीदसदन्मातरं पुनः। पितरं च प्रयन्स्त्व:: त्रिंशध्दाम विराजति वाक्प्रतंङ:गाय शिश्रिये। प्रत्यस्य अहद्युभिः। अस्य प्राणादपानात्पन्तच्चरति रोचना व्यख्यन्महिषस्सुवः। यत्वा क्रुध्दा परोवपमन्युना यदवर्त्या। सुकल्पमग्रे तत्तव पुनस्तोद्दिप यामसि। यत्तेमन्युपरोप्तस्य पृथिवीमनु दध्वसे। आदित्या विश्वें दृते वा वसवश्च समाभरन। मंदिनी देवी वसुन्धरास्यद्वसुधा देवी वासवी ब्रह्म्वर्चसः पितृणाँ श्रोत्रं चक्षुर्मनः। देवी हिरण्यगर्भिणी देवी प्रसुव सोदरी सदने सत्यायने सीद। समुद्रवती सावित्री हनो देवी महयङ:गी। महीधरणी महोध्य तिष्ठत्। श्रङःगेश्रृङःगे यज्ञे यज्ञे विभिषिणी। इंद्रपत्नी व्यापिनी सुर सरि दिह (सरसिजइह) वायुमती जलशयनी श्रियंधा (स्वयंधा) राजा सत्यन्तो परि मे दिनी श्वो (सो) परिधत्तं गाय। विष्णू पत्नी महिं देवी माधवी माधव प्रियां। लक्ष्मी प्रिय सखीं देवी नमाम्यच्च्यत वल्लभाम्। ॐ धनुर्धराय विद्महे सर्व सिध्यै च धी-महि। तन्नो धरा प्रचोदयात) - (पृथ्वी गायत्री) महीं देवीं विष्णु पत्नी मजूर्याम। प्रतिचां मनाँग हविषा यजामः। त्रेधा विष्णुरूरूगायो विचक्रमे। महीं दिवँ पृथिवी मन्तरिक्षं। यच्छृणोति श्रव इच्छमाना पुण्यँ श्लोकं यजमानाय कृण्वती। हरि ॐ इति भूसूक्तं॥ ॥श्री स्वामी समर्थ महाराजार्पणमस्तु॥

पार्वति स्तोत्रम्

शक्ति स्वरूपे सर्वेषां सर्वाधारे गुणाश्रये
सदा शंकर युक्तेच पतीं देहि नमोस्तुते॥ १॥
सृष्टि स्थित्यंत रूपेन सृष्टी स्थित्यंत रूपिणि।
सृष्टी स्थित्यन्त बीजानां बीज रूपे नमोस्तुते॥ २॥
हे गौरी पतिमर्मज्ञे पविव्रता परायणे।
पतिव्रते पतिरते पति देहि नमोस्तुते॥ ३॥

सर्व मंगल मांगल्ये सर्व मंगल संयुते।
सर्व मंगल बीजेच नमस्ते सर्व मंगल्ये॥ ४॥
सर्व प्रीय सर्व बीजे सर्वा शुभ विनाशनी।
सर्वेशे सर्व जनके नमस्ते शंकर प्रिये॥ ५॥
परमात्म स्वरूपेच नित्यरूपे सनातनी।
साकारेच निराकारे सर्व रूपे नमो स्तुते॥ ६॥
क्षुद्तृष्णेच्छा दया श्रद्धा निद्रांतन्द्रा स्मृतिःक्षमा।
एतास्तवकलाः सर्वा नारायणी नमोऽस्तुत्ते॥ ७॥
लज्जा मेधा तुष्टी पुष्टी शांती संपत्ती वृध्द्याः।
एतास्तव कलाः सर्वाः सर्वरूपे नमो स्तुते॥ ८॥
दृष्टा दृष्ट स्वरूपेच तयोर्बीज फलप्रदे।
सर्वा निर्वचनीयच महामाये नमोस्तुते॥ ९॥
शिवे शंकर सौभाग्य युक्ते सौभाग्य दामिनी।
हरि कांतच सौभाग्य देही देवी नमोऽस्तुते॥ १०॥
स्तोत्रेणानेन याः स्तुत्वा समाप्ती दिवसे शिवांम।
नमन्ति परमा भक्त्या ता लभन्ति हरी पतीम्॥ ११॥
इह कांतं सुखं भुक्त्या पतिं प्राप्य परापरंम।
दिव्य स्यंदन मारूह्ययान्त्यन्ते कृष्ण संनिधिमे॥ १२॥

इति श्री ब्रह्म वैवर्ते जानकी कृत पार्वती स्तोत्रम संपूर्णम्।

सिध्दकुन्जिकास्तोत्रम्

शिव उवाच

ॐ शृणु देवि प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम्।
येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत्॥ १॥
न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकम्।
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम्॥ २॥

कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत्।
अति गुह्यतरं देवि देवानामपि दुर्लभम्॥ ३॥
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति।
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम्।
पाठमात्रेण संसिद्ध्येत् कुञ्जिकास्तोत्रमुत्तमम्॥ ४॥

अथ मन्त्रः

॥ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे॥ॐ ग्लौं हुं क्लीं जूं सः
ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल
ऐं ह्रीं क्लीं चामुण्डायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा

॥इति मन्त्रः॥

नमस्ते रूद्ररूपिण्यै नमस्ते मधुमर्दिनि।
नमः कैटभहारिण्यै नमस्ते महिषार्दिनि॥ १॥
नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि॥ २॥
जाग्रतं हि महादेवि जपं सिद्धं कुरूष्व मे।
ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका॥ ३॥
क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते।
चामुण्डा चण्डघाती च यैकारी वरदायिनी॥ ४॥
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि॥ ५॥
धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी।
क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरू॥ ६॥
हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी।
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः॥ ७॥
अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरू कुरू स्वाहा॥

पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा॥ ८॥
सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं कुरुष्व मे॥
इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति॥
यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत्।
न तस्य जायते सिद्धिररण्ये रोदनं यथा॥

इति श्रीरुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे
कुञ्जिकास्तोत्रं सम्पूर्णम्।
॥ ॐ तत्सत् ॥

अथ तन्त्रोक्तं रात्रिसूक्तम्

ॐ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम्।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः॥ १॥

ब्रह्मोवाच

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता॥ २॥
अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः।
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा॥ ३॥
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत्।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा॥ ४॥
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये॥ ५॥
महाविद्या महामाया महामेधा महास्मृतिः।
महामोहा च भगवती महादेवी महासुरी॥ ६॥
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा॥ ७॥

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च॥ ८॥
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा॥ ९॥
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी।
परापराणां परमा त्वमेव परमेश्वरी॥ १०॥
यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा॥ ११॥
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत्।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः॥ १२॥
विष्णुः शरीरग्रहणमहमीशान एव च।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्॥ १३॥
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ॥ १४॥
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ॥ १५॥

इति रात्रिसूक्तम्

श्री मारूती स्तोत्र

भीमरूपी महारूद्रा वज्रहनुमान मारूती। वनारी अंजनीसूता रामदूता प्रभंजना॥ १॥ महाबळी प्राणदाता सकळां उठवी बळें। सौख्यकारी दु:खहारी दूत वैष्णवगायका॥ २॥ दिनानाथा हरीरूपा सुंदरा जगदंतरा। पातालदेवताहंता भव्यसिंदूरलेपना॥ ३॥ लोकनाथा जगन्नाथा प्राणनाथा पुरातना। पुण्यवंता पुण्यशीला पावना परतोषका॥ ४॥ ध्वजांगे उचली बाहो आवेशें लोटला पुढें। काळाग्नि काळरूद्राग्नि देखतां कांपती भयें॥ ५॥ ब्रह्मांडे माइली नेणों आंवळे दंतपंगती। नेत्राग्नि चालिल्या

ज्वाळा, भुकुटी ताठिल्या बळें॥ ६॥ पुच्छ तें मुरडिलें माथां किरीटी कुंडलें बरीं। सुवर्णकटिकासोटि घंटा किंकिणि नगारा॥ ७॥ ठकारे पर्वताऐसा नेटका सडपातळू। चपळांग पाहतां मोठें महाविद्युल्लतेपरी॥ ८॥ कोटिच्या कोटि उड्डाणें झेंपावे उत्तरेकडे। मंदाद्रीसारिखा द्रोणु क्रोधें उत्पाटिला बळें॥ ९॥ आणिला मागुती नेला आला गेला मनोगती। मनासी टाकिले मागे, गतीसी तुळणा नसे॥ १०॥ अणुपासोनि ब्रह्मांडायेवढा होत जातसे। तयासी तुळणा कोठे? मेरूमंदार धाकुटे!॥ ११॥ ब्रह्मांडाभोवते वेढें वज्रपुच्छें करूं शके। तयासी तुळणा कैची? ब्रह्मांडी पाहतां नसे!॥ १२॥ आरक्त देखिलें डोळा ग्रासिले सूर्यमंडळा। वाढतां वाढतां वाढे भेदिले शून्यमंडळा॥ १३॥

फलश्रृती: धन्यधान्य पशुवृद्धि पुत्रपौत्र समग्रही। पावती रूपविद्यादि स्तोत्रपाठें करूनियां॥ १४॥ भूतप्रेतसमंधादि रोगव्याधी समस्तही। नासती तूटती चिंता, आनंदें भीमदर्शनें॥ १५॥

प्रार्थना: हे धरा पंधरा श्लोकी लाभली शोभली बरी। दृढदेहो निसंदेहो संख्या चंद्रकळा गुणे॥ १६॥ रामदासी अग्रगणू कपिकुळासि मंडणू। रामरूपीं अंतरात्मा दर्शनें दोष नासती॥ १७॥ इति श्रीरामदासकृतं संकटनिरसनं मारूतिस्तोत्र संपूर्णम्॥ ॥श्री सीतारामचंद्रार्पणमस्तु॥

(श्रीरामचंद्रसीता प्रोक्तं) श्री पंचमुख हनुमत्कवचम्

श्री गणेशाय नम:। अथ मंत्र:। ॐ श्रीरामदूताय आंजनेयाय वायुपुत्राय महाबलप्राक्रमाय कोलाहल सकल ब्रह्मांडविश्वरूपाय सप्तसमुद्र निर्लंघनाय पिंगलनयन य अमितविक्रमाय सूर्य बिंबफल सेवनाय दुष्टनिवारणाय दृष्टिनिरालंकृताय संजीवनी संजीवितांगद-लक्ष्मण महाकपिसैन्य प्राणदाय दशकंठविध्वंसनाय रामेष्टाय महाफाल्गुनसखाय

सीतासंहितरामवरप्रदाय षट्प्रयोगागम- पंचमुख हनुमन्मंत्र जपे विनियोग:॥

ॐ हरिमर्कट मर्कटाय बंबंबंबंबं वौषट् स्वाहा। ॐ हरिमर्कटमर्कटाय फंफंफंफंफं फट् स्वाहा। ॐ हरिमर्कटमर्कटाय खेंखेंखेंखेंखें मारणाय स्वाहा। ॐ हरिमर्कटमर्कटाय लुंलुंलुंलुंलुं आकर्षित सकलसंपत्कराय स्वाहा। ॐ हरिमर्कटमर्कटाय धंधंधंधंधं शत्रुस्तंभनाय स्वाहा। ॐ टंटंटंटंटं कूर्ममूर्तये पंचमुख- वीरहनुमते परयंत्र- परतंत्र- उच्चारनाय स्वाहा। ॐ कं खं गं घं ङं चं छं जं झं त्रं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं स्वाहा। इति दिग्बंध:।

ॐ पूर्वकपिमुखाय पंचमुख- हनुमते टं टं टं टं टं सकलशत्रु संहरणाय स्वाहा। ॐ दक्षिणमुखाय पंचमुख हनुमते करालवदनाय नरसिंहाय ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौ ह्रं सकल-भूत-प्रेत दमनाय स्वाहा। ॐ पश्चिममुखाय गरूडाननाय पंचमुख- हनुमते मं मं मं मं मं सकल विषहराय स्वाहा। ॐ उत्तरमुखाय- आदिवराहाय लं लं लं लं लं नृसिंहाय नीलकंठ- मूर्तये पंचमुख हनुमते स्वाहा। ॐ ऊर्ध्वमुखाय हयग्रीवाय रूं रूं रूं रूं रूं रूद्रमूर्तये सकल प्रयोजन- निर्वाहकाय स्वाहा। ॐ अंजनीसुताय वायुपुत्राय महाबलाय सीता-शोक- निवारणाय श्रीरामचंद्रकृपा पादुकाय महावीर्य- प्रमथाय ब्रह्मांडनाथाय कामदाय पंचमुख-वीर- हनुमते स्वाहा। भूत-प्रेत- पिशाश्च-ब्रह्मांराक्षस-शाकिनी- डाकिनी अंतरिक्षग्रह- परयंत्र- परतंत्र- उच्चाटनाय स्वाहा। सकल प्रयोजन निर्वाहकाय पंचमुखवीरहनुमते श्रीरामचंद्र- वर- प्रसादाय जं जं जं जं जं स्वाहा॥

इदं कवचं पठित्वा तु महाकवचं पठेन्नर:। एक वारं जपेत् सर्वशत्रु निवारणं॥ द्विवारं तु पठेत् नित्यं पुत्रपौत्र-प्रवर्धनम्॥ त्रिवारं च पठेत् नित्यं सर्व संपत्करं शुभम्॥ चतुर्वारं पठेत् नित्यं

सर्वरोग-निवारणम्॥ पंचवारं पठेत् नित्यं सर्वं लोक- वशंकरम्॥ षड्वारं च पठेन्नित्यं सर्वदेव- वशंकरम्। सप्तवार पठेन्नित्वं सर्वसौभाग्यदायकम्॥ अष्टवारं पठेन्नित्यं इष्टकामार्थसिद्धिदम्॥ नववारं पठेन्नित्यं राजभोगं अवाप्नुयात्॥ दशवारं पठेन्नित्यं त्रैलोक्य- ज्ञान- दर्शनम्॥ रूद्रावृत्तिं (अकरा वेळा) पठेन्नित्यं सर्वसिध्दि भवेत् ध्रुवम्॥ निर्बलो रोगयुक्तः च महाव्याध्यादि- पीडितः। कवच-स्मरणेन इव महाबलं अवान्पुयात्॥ इति श्रीसुदर्शनसंहितायां श्रीरामचंद्रसीता-प्रोक्त श्रीपंचमुखहनुमत्कवचं संपूर्णम्॥

श्रीराम रक्षा (संस्कृत)

श्री गणेशाय नमः। अस्य श्रीरामरक्षास्तोत्रमंत्रस्य।
बुधकौशिक ऋषिः। श्री सीतारामचन्द्रो देवता।
अनुष्टुप छन्दः। सीता शक्तिः श्रीमत् हनुमान्
कीलकम् श्रीरामचंद्रप्रीत्यर्थे राम रक्षा स्तोत्र जपे विनियोगः।
अथध्यानम्।
ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं।
पीतं वासो वसानं नवकमलदल स्पर्धि नेत्रं प्रसन्नम्।
वामांकारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं।
नानालंकारदीप्तं दधतमुरूजटामण्डनं रामचंद्रम्।
इतिध्यानम्
चरितं रधुनाथस्य शतकोटिप्रविस्तरम्
एकैकमक्षरं पुसां महापातकनाशनम्॥ १॥
ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्।
जानकी लक्ष्मणोपेतं जटामुकुटमण्डितम्॥ २॥
सासितूण धनुर्बाणपाणिं नक्तं चरान्तकम्।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम्॥ ३॥

रामरक्षां पठेत्प्राज्ञ:पापघ्नी सर्वकामदाम।
शिरो मे राघव: पातु भालं दशरथात्मज: ॥ ४ ॥
कौसल्येयो दृशौ पातु विश्वामित्र प्रिय: श्रुती
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सल: ॥ ५ ॥
जिव्हां विद्यानिधि:पातु कण्ठं भरतवन्दीत:
स्कन्धौ दिव्यायुध:पातु भुजौ भग्नेशकार्मुक: ॥ ६ ॥
करौ सीतापति: पातु हृदयं जामदग्न्यजित्।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रय: ॥ ७ ॥
सुग्रीवेश:कटी पातु सक्थिनी हनुमत्प्रभु:।
उरू रघुत्तम: पातु रक्ष: कुल विनाशकृत ॥ ८ ॥
जानुनी सेतुकृत्पातु जंघे दशमुखान्तक:।
पादौ बिभीषणश्रीद: पातु रामोऽखिलं वपु: ॥ ९ ॥
एतां रामबलोपेतां रक्षां य: सुकृती पठेत्।
स चिरायु: सुखी पुत्री विजयी विनयी भवेत् ॥ १० ॥
पातालभूतलव्योमचारिणश्छद्मचारिण:।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभि: ॥ ११ ॥
रामेति रामभद्रेति रामचंद्रेति वा स्मरन्।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिंच विन्दति ॥ १२ ॥
जगज्जैत्रेक मन्त्रेण रामनाम्नाभिरक्षितम्।
य: कण्ठे धारयेत्तस्य करस्था:सर्वसिद्धय: ॥ १३ ॥
वज्रपत्रजरनामेंद यो रामकवचं स्मरेत।
अव्याहताज्ञ:सर्वत्र लभते जय मंगलम् ॥ १४ ॥
आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हर:।
तथा लिखितवान् प्रात: प्रबुद्धो बुधकौशिक: ॥ १५ ॥
आराम: कल्पवृक्षाणां विराम: सकलापदाम्।
अभिरामस्त्रिलोकानां राम: श्रीमान् सन: प्रभु: ॥ १६ ॥

तरूणौ रूपसंपनौ सुकुमारौ महाबलौ।
पुण्डरीक विशालाक्षौ चीरकृष्णाजिनाम्बरौ॥ १७॥
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ।
पुत्रौ दशरथस्यैत्तौ भ्रातरौ रामलक्ष्मणौ॥ १८॥
शरण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मताम्।
रक्षः कुलनिहन्तारौ त्रायेतां नो रघुत्तमौ॥ १९॥
आत्तसज्ज धनुषाविषुस्पृशा वक्षयाशुगनिषंङसङ्गिनौ।
रक्षणाय मम् रामलक्ष्मणा वग्रतः पथि सदैव गच्छताम॥ २०॥
सनद्धः कवची खड्गी चापबाणधरो युवा।
गच्छन मनोरथोऽस्माकं रामः पातु सलक्ष्मणः॥ २१॥
रामो दशरथिः शूरो लक्ष्मणानुचरो बली।
काकुत्स्थः पुरूषः पूर्णः कौसल्येयो रघुत्तमः॥ २२॥
वेदान्तवेद्यो यज्ञेशः पुराण पुरूषोत्तमः।
जानकी वल्लभः श्रीमान प्रमेय पराक्रमः॥ २३॥
इत्येतानि जपन् नित्यं मद्भक्तः श्रद्धयान्वितः।
अश्वमेधाधिकं पुण्यं संप्राप्नोति न संशयः॥ २४॥
रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम्।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः॥ २५॥
रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं।
काकुत्स्थं करूणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम्॥ २६॥
राजेंद्र सत्यसंधं दशरथतनयं श्यामलं शान्तमूर्तिं।
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम्॥ २७॥
रामाय रामभद्राय रामचंद्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥ २८॥
श्रीराम राम रघुनंदन राम राम। श्रीराम राम भरताग्रज राम राम॥
श्रीराम राम रणकर्कश राम राम। श्रीराम राम शरणं भवं राम

राम ॥ २९ ॥
श्रीरामचंद्र चरणौ मनसा स्मरामि। श्री रामचंद्र चरणौ वचसा गृणामि।
श्रीरामचंद्र चरणौ शिरसा नमामि। श्रीरामचंद्र चरणौ शरणं प्रपद्ये ॥ ३० ॥
माता रामो मत्पिता रामचंद्रः। स्वामी रामो मत्सरवा रामचंद्रः ॥
सर्वस्वं मे रामचंद्रो दयालुर्नान्यं। जाने नैव जाने न जाने ॥ ३१ ॥
दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा।
पुरतो मारूतिर्यस्य तं वन्दे रघुनन्दनम् ॥ ३२ ॥
लोकाभिरामं रणरंगधीरं। राजीवनेत्रं--
रघुवंशनाथम् कारूण्यरूपं करूणाकरम्तं। श्रीरामचंद्रं शरणं प्रपद्ये ॥ ३३ ॥
मनोजवं मारूततुल्यवेगं जितेंद्रियं बुद्धि मतां वरिष्ठम्।
वातात्मजं वानरयुथ मुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥ ३४ ॥
कूजन्तं रामरामेति मधुरं मधुराक्षरम्।
आरूह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ ३५ ॥
आपदाम पहर्तारं दातारं सर्वसंपदाम।
लोकाभि रामं श्रीरामं भूयोभूयो नमाम्यहम् ॥ ३६ ॥
भर्जनं भवबीजाना मर्जनं सुखसंपदाम्।
तर्जनं यमदूतानां रामरामेति गर्जनम् ॥ ३७ ॥
रामो राजमणि सदा विजयते रामं रमेशं भजे।
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ॥
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यंह।
रामे चित्तलयः सदा भवतुमे भो राम मामुद्धर ॥ ३८ ॥
रामरामेति रामेति रमे रामे मनोरमे।
सहस्त्रनाम तत्तुल्यं रामनाम वरानने ॥ ३९ ॥
इति श्री बुधकौशिक चिरचितं
- राम रक्षा स्त्रोत्रम् संपुर्णम् -
॥ श्रीसीताराम चंद्रार्पणमस्तु ॥

पुरूषसूक्त (मराठी)

(चाल- चंद्रकांत राजाची)

हरि ॐ अनंत शीर्षे अनंतचक्षु अनंत पदधारी। चराचराते व्यापुनी उरला दशांगुले श्रीहरी॥ १॥ महापुरूष हा त्रिकालभर्ता देवांचा देवो। अजन्मापरी सोडुनी धांवे रक्षणार्थ ठावो॥ २॥ दृश्य जगत् हे महिमा याचा एकचि पद मात्र। अदृश्यातही नांदती त्रिपदें याची सत्पात्र॥ ३॥ त्रिकाल आत्मा विभू निरंजन अनंतात डोले। एकच ज्योती उत्पत्ती लय खंडहीन खेळे॥ ४॥ चेतन नोहें अचेतनाही जागवुनी उरला। अविद्येत जे रमले त्यांना भासुनि ना दिसला॥ ५॥ चराचर या निर्मुनि तेणें जीवहि बनवियले। नाना रूपें अस्थि इंद्रिये विश्‍व थोर नटले॥ ६॥ पुढे विभूने यज्ञ मांडिला जीव हविर्द्रव्य। वसंत झाला आज्य, ग्रीष्म तो इंधनही हव्य॥ ७॥ शरद सरारे हविर्द्रव्यसा लोट लोट्टुनिया। याग जाहला कल्पनावनीं पुरूष-सूक्त गाया॥ ८॥ जीवही रमता यज्ञ साधनी देव सृजन झाले। सृष्टी-वर्धना तसे रक्षणा ऋषी ज्ञानी सजले॥ ९॥ देव ऋषींनी यज्ञ रक्षिता आज्य दधि सिंधू। अहा उसळले भाविक भक्ता भुललेही भोंदु॥ १०॥ अरण्यवासी पवनाहारी जीवही ते सृजन। ग्रामीं नगरीं पशु जाहले तदाच निर्माण॥ ११॥ अनादि काली महायज्ञ तो असा चेतनाना। ऋग्वेद यजुः साम छंदही उठलें स्वर नाना॥ १२॥ यज्ञसाधनी अश्‍वहि झालें पशु उभयदंती। गोमाताहि शेळ्या मेंढ्या सृजन यज्ञप्राप्ती॥ १३॥ सहस्त्रशीर्षे पुरूष जन्मला विराट तो कैसा। हस्त पाद नी मुख मांड्या त्या जाणाव्या कैशा॥ १४॥ ब्राह्मण त्याचे मुख जाणावे, क्षत्रिय बाहुबल। वैश्यहि मांड्या शूद्र तयाचे पद जाणा मूळ॥ १५॥ चंद्रापासुनी मन जाहले सूर्य सृजण नेत्री। अग्नि

इंद्र मुक ज्याचे ते वायु प्राण सूत्री॥१६॥ अन्तरिक्ष ते नाभी ज्याचे शीर्षे हेच स्वर्ग। पदापासुनि भूमिमाता दिशा कर्ण मार्ग॥१७॥ देव रंगलें यज्ञसमाधनी एकवीस समिधा। जीवसृष्टी ही विराट पुरूष हव्यच त्या छंदा॥१८॥ द्वादश महिने पंचऋतुंनी सप्त छंद परिधी। रवीसवे ते त्रिलोक जाणा हव्य यज्ञभागीं॥१९॥ देववरांनी सर्वस्वाचा यज्ञ असा करूनी। महत्पदाते चढल्या जीवा गौरविते वाणी॥२०॥ यज्ञसाधना अशी जगाच्या कारण वाढीशी। महाजनाते तेच देव हे नेती स्वर्गासी॥२१॥ संपूर्ण॥

पुरूषसूक्त (संस्कृत)

सहस्रशीर्षा पुरूषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वा, ऽत्यतिष्ठद्दशाङ्गुलम्॥१॥
पुरूष एवेदं सर्वं, यद्भूतं यच्च भव्यम्।
उतामृतत्वस्येशानो, यदन्नेनातिरोहति॥२॥
एतावानस्य महिमा, अतो ज्यायाँश्च पूरूषः।
पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि॥३॥
त्रिपादूर्ध्व उदैत् पुरूषः, पादोऽस्येहाभवत् पुनः।
ततो विष्वङ् व्यक्रामत्, साशनानशने अभि॥४॥
तस्माद्विराळजायत, विराजो अधि पुरूषः।
स जातो अत्यरिच्यत, पश्चाद्भूमिमथो पुरः॥५॥
यत् पुरूषेण हविषा, देवा यज्ञमतन्वत।
वसन्तो अस्यासीदाज्यं, ग्रीष्म इध्मः शरद्धविः॥६॥
तं यज्ञं बर्हिषि प्रौक्षन्, पुरूषं जातमग्रतः।
तेन देवा अजयन्त, साध्या ऋषयश्च ये॥७॥
तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम्।
पशून् ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये॥८॥

तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मा- द्यजुस्तस्मादजायत॥ ९॥
तस्मादश्वा अंजायन्त, ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्, तस्माज्जाता अजावयः॥ १०॥
यत् पुरूषं व्यदधुः, कतिधा व्यकल्पयन्।
मुखं किमस्य कौ बाहू, का ऊरू पादा उच्चेते॥ ११॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः, पद्भ्यां शूद्रो अजायत॥ १२॥
चन्द्रमा मनसो जात-श्चक्षोः सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च, प्राणाद्वायुरजायत॥ १३॥
नाभ्या आसीदन्तरिक्षं, शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात, तथा लोकाँ अकल्पयन्॥ १४॥
सप्तास्यासन् परिधय-स्त्रिःसप्तः समिधः कृताः।
देवा यद्यज्ञं तन्वाना, अबध्नन् पुरूषं पशुम्॥ १५॥
यज्ञेन यज्ञमयजन्त देवा-स्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ १६॥

फलश्रुती

हरि ॐ अतो देवा अवन्तु नो यतो विष्णु र्विचक्रमे।
पृथिव्याः सप्त धामभिः॥ १॥
इदं विष्णु र्विचक्रमे त्रेधां निदधे पदम।
समूळहमस्य पांसुरे॥ २॥
त्रिणी पदा र्विचक्रमे विष्णु र्गोपा अदाभ्य :।
अतो धर्माणी धारयन्॥ ३॥
विण्षो कर्माणि पश्यत यतो व्रतानि पस्पसे।
इंद्रस्य युज्य : सखा॥ ४॥
तद्विष्णो परमं पदं सदा पश्यन्ति सूरय :।

दिवीव चक्षुरा ततम् ॥ ५ ॥
तद्विप्रांसो विपन्यवो जागृवासं समिंधती।
विष्णोर्यत परमं पदम् ॥ ६ ॥

शान्ति मंत्र -
ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अग्रेस्तेजसा सूर्यस्य वर्चसे न्द्रस्येंद्रियेणाभिषिंचाभि। बलाय श्रियै यशसेन्नाद्याय। ॐ भूर्भुवः स्वः अमृताभिषकोऽस्तु। शान्तिः पुष्टिस्तुष्टिश्चास्तु। ॐ शान्तिः शान्तिः शान्तिः ॥

व्यंकटेश स्तोत्र !!

हरि ॐ व्यंकटेशो वासुदेव : प्रद्युम्नोऽमितविक्रमः
संकर्षणो अनिरूद्धश्र्च शेषाद्रिपतिरेव च ॥ १ ॥
जनार्दनः पद्मनामो व्यंकटाचलवासीन :।
सृष्टिकरता जगन्नाथो माधवो भक्तवत्सलः ॥ २ ॥
गोविंदो गोपतिः कृष्ण केशवो गरूडध्वजः।
वराहो वामनश्चैव नारायण अधोक्षजः ॥ ३ ॥
श्रीधरः पुंडरिकांक्ष सर्वदेवस्तुतो हरिः।
